# puShkarAShTakam

# પુષ્કરાષ્ટકમ્

## Document Information

Text title : puShkarAShTakam

File name : puShkarAShTakam.itx

Category : aShTaka, misc, stotra, shankarAchArya

Location : doc_z_misc_general

Author : Shankaracharya

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, PSA Easwaran

Latest update : May 21, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# પુષ્કરાષ્ટકમ્

શ્રીગણેશાય નમઃ ॥
શ્રિયાયુતં ત્રિદેહતાપપાપરાશિનાશકં
    મુનીન્દ્રસિદ્ધસાધ્યદેવદાનવૈરભિષ્ટુતમ્ ।
તટેસ્તિ યજ્ઞપર્વતસ્ય મુક્તિદં સુખાકરં
    નમામિ બ્રહ્મપુષ્કરં સવૈષ્ણવં સશઙ્કરમ્ ॥ ૧॥

સદાર્યમાસશુષ્કપઞ્ચવાસરે વરાગતં
    તદન્યથાન્તરિક્ષગં સુતન્ત્રભાવનાનુગમ્ ।
તદમ્બુપાનમજ્જનં દૃશાં સદામૃતાકરં
    નમામિ બ્રહ્મપુષ્કરં સવૈષ્ણવં સશઙ્કરમ્ ॥ ૨॥

ત્રિપુષ્કર ત્રિપુષ્કર ત્રિપુષ્કરેતિ સંસ્મરેત્-
    સ દૂરદેશગોઽપિ યસ્તદઙ્ગપાપનાશનમ્ ।
પ્રપન્નદુઃખભઞ્જનં સુરઞ્જનં સુધાકરં
    નમામિ બ્રહ્મપુષ્કરં સવૈષ્ણવં સશઙ્કરમ્ ॥ ૩॥

મૃકણ્ડુમઙ્કુણૌ પુલસ્ત્યકણ્વપર્વતાસિતા
    અગસ્ત્યભાર્ગવૌ દધીચિનારદૌ શુકાદયઃ।
સપદ્મતીર્થપાવનૈકદૃષ્ટ્યો દયાકરં
    નમામિ બ્રહ્મપુષ્કરં સવૈષ્ણવં સશઙ્કરમ્ ॥ ૪॥

સદા પિતામહેક્ષિતં વરાહવિષ્ણુનેક્ષિતં
    તથાઽમરેશ્વરેક્ષિતં સુરાસુરૈઃ સમીક્ષિતમ્ ।
ઇહૈવ ભુક્તિમુક્તિદં પ્રજાકરં ધનાકરં
    નમામિ બ્રહ્મપુષ્કરં સવૈષ્ણવં સશઙ્કરમ્ ॥ ૫॥

ત્રિદણ્ડિદણ્ડિબ્રહ્મચારિતાપસૈઃ સુસેવિતં
    પુરાર્ધચન્દ્રપ્રાપ્તદેવનન્દિકેશ્વરાભિધૈઃ ।
સવૈદ્યનાથનીલકણ્ઠસેવિતં સુધાકરં

નમામિ બ્રહ્મપુષ્કરં સવૈષ્ણવં સશઙ્કરમ્ ॥ ૬॥

સુપઞ્ચધા સરસ્વતી વિરાજતે યદન્તરે
તથૈકયોજનાયતં વિભાતિ તીર્થનાયકમ્ ।
અનેકદૈવપૈત્રતીર્થસાગરં રસાકરં
નમામિ બ્રહ્મપુષ્કરં સવૈષ્ણવં સશઙ્કરમ્ ॥ ૭॥

યમાદિસંયુતો નરસ્ત્રિપુષ્કરં નિમજ્જતિ
પિતામહશ્ચ માધવોપ્યુમાધવઃ પ્રસન્નતામ્ ।
પ્રયાતિ તત્પદં દદાત્યયત્નતો ગુણાકરં
નમામિ બ્રહ્મપુષ્કરં સવૈષ્ણવં સશઙ્કરમ્ ॥ ૮॥

ઇદં હિ પુષ્કરાષ્ટકં સુનીતિનીરજાશ્રિતં
સ્થિતં મદીયમાનસે કદાપિ માઽપગચ્છતુ ।
ત્રિસન્ધ્યમાપઠન્તિ યે ત્રિપુષ્કરાષ્ટકં નરાઃ
પ્રદીપ્તદેહભૂષણા ભવન્તિ મેશકિઙ્કરાઃ ॥ ૯॥

ઇતિ શઙ્કરાચાર્યવિરચિતં શ્રીપુષ્કરાષ્ટકં સમાપ્તમ્ ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com, NA

*puShkarAShTakam*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*